International Journal of Sanskrit Research 2021; 7(2): 118-121

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(2): 118-121
© 2021 IJSR
www.anantaajournal.com
Received: 01-01-2021
Accepted: 03-02-2021

**निकुंज त्रिवेदी**
संस्कृत विभाग, अपेक्स
महाविद्यालयः जयपुरम्
राजस्थानम्, भारत

**Corresponding Author:**
**निकुंज त्रिवेदी**
संस्कृत विभाग, अपेक्स
महाविद्यालयः जयपुरम्
राजस्थानम्, भारत

# पुराणेषु वर्णितानां देवीरहस्यानां समीक्षात्मकं परिशीलनम्

**निकुंज त्रिवेदी**

**सारांश**

जगदम्ब विचित्रमत्र किं परिपूर्णाकरुणास्ति चेन्मयि ।
अपराधपरम्परापरं न हि माता समुपेक्षते सुतम् ।।
देव्यपराधयक्षमापनस्तोत्रम्- 11

देव्याः करुणा परिपूर्णरूपेण अस्माकं सर्वेषामुपरि भवत्येव । अत एव वयं देवीरहस्यानां ज्ञानार्थं चिन्तनार्थम् अवबोधनार्थञ्च एतस्मिन्मार्गे यामः। अनादिकालात् प्रतिष्ठिता एकरूपाऽपि जगन्मातुरूपासना नामरूपाभ्यां वैविध्यमासाध्य साधकरुचि भेदात् अनेकरुपताम्, रहस्यम्, प्रशस्ततां च भजते। भक्तियोगज्ञानानां यादृशः समन्वयोऽस्मिन् मते शाक्तधर्मे उपलभ्यते नैतादृशोऽन्येषु । देवीरहस्यप्रतिपादकानां संख्या प्रायः अत्यल्पा वर्तते ।
भारतीय वाङ्गमयस्य संस्कृतेश्च द्वौ आधारौ वर्तेते ।
**१. निगमः। २. आगमः।**
निगमे पुराणाः, पुराणेषु देवीरहस्यम्, सरलम्, सहजञ्च लभते । भगवता शङ्करेणोपदिष्टोऽयं मार्गः मुख्यतया शक्तेः ज्ञानार्थमस्ति, किन्त्वत्र भगवत्याः रहस्यं कठीनं दुष्करञ्च वर्तते। पुराणानि भारतीयसाहित्यसागरस्य अमूल्यरत्नानि वर्तन्ते । विना पुराणाध्ययनेन न कोऽपि विद्वान् भवति । पुराणेषु बहूनि रहस्यानि सन्ति। तत्र सर्वमस्ति। सर्वेषां विषयाणां ज्ञानं पुराणेषु दृश्यते । तानि अष्टादशानि पुराणानि आख्यायन्ते ।

"महापुराणान्येतानि ह्यष्टादश महामुने" ।
विष्णुपुराणम् - ६.२५

एषु अष्टादशपुराणेषु या शक्तिः वर्तते, सा शक्तिरेव देवी इति विद्वद्भिः मन्यते।

" पुराणानां माहात्म्यक्रमः परिचयात्मकं निरुपणञ्च "

**कुट शब्दः** पुराणेषु वर्णितानां, देवीरहस्यानां, समीक्षात्मकं परिशीलनम्

**प्रस्तावना**
वेदानां वाङ्मयमप्रतिमस्ति । लौकिकपरलौकिकयोः परं ज्ञाताज्ञातयोः अनेकेषां विषयाणां वर्णनं गूढरुपेण रहस्येन च वेदेषु उपलभ्यते । एतेषामेव वेदानां विस्तारः, प्रचारश्च भवेत्, तदर्थं भगवता वेदव्यासेन पुराणानां रचना कृता ।।

विस्ताराय तु वेदानां स्वयं नारायणः प्रभुः ।
व्यासरुपेण कृतवान् पुराणानि महितले ।।
पुरारार्णवः (१.२५)

तत्र पुराणे वेदार्थाः सरल-सहजसुबोधिशैल्या च प्रतिपादिताः सन्ति ।
पुराणानामपि वेदरूपेण गणना क्रियते यथा -

इतिहास पुराणानि पंञ्चम वेदमीश्वरः ।
सर्वेभ्यः एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ।।
श्रीमद्भागवतमहापुराणम्(3.12.39)

**अन्यच्च -**

पुराणं पञ्चमो वेद इति ब्रह्मानुशासनम् ।
यो न वेद पुराणं हि न स वेदान्न किञ्चन ।।
स्कन्दपुराणम्.रेवाखण्ड (उत्त.1.18)

**अन्यच्च -**

चतुर्थमितिहासं पुराणं पञ्चमो वेदानां वेदम् ।।
छान्दोग्योपनिषद् (7.1.1)

**अन्यच्च -**

सर्व वेदार्थसाराणि पुराणानीति भूयते ।।
नारदपुराणम् (9.100)

**अन्यच्च -**

इतिहास पुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति ।।
महाभारतम्. आदिपर्वम् (1.267)

**अन्यच्च -**

यस्मात् पुरा ह्यनितीदं पुराणं तेन तत् स्मृतम् ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ।।
वायुपुराणम् (1.203)

व्याकरणदृष्टया "पुरा भव" इति निग्रहात् पुराणशब्दः निष्पद्यते । अत्र पुरा इति अव्ययम् ।

'सायञ्चिरम्प्राह्णेप्रगेऽव्ययेभ्यष्टुष्ट्युलौ तुट् च'
पाणिनि अष्टाध्यायी4/3/23

इति सूत्रेण ट्यु प्रत्यये टकारस्य इत्संज्ञा लोपे च "युवारनाक" इत्यनेन अन् कृते तथा च "अट्कुप्वाङ्नुम्व्यवायेऽपि" इत्यनेन णत्वे कृते "पुराण" इति शब्दः निष्पद्यते ।

अस्य त्रयः पर्यायवाची शब्दाः सन्ति-

"स्यात्प्रबन्धे पुरातीते निकटाऽगामिके पुरा ।।
अमरकोषः - 3.3.253

पुरा भूत्वाऽपि ये नूतनाः सन्ति ते पुराणाः उच्यन्ते। पुराणानां पञ्च लक्षणानि सन्ति -

**1. सर्गः**

जगतः तथा च नानाविधपदार्थानामुत्पत्तिः। जगतः सकलवस्तूनामुत्पत्तिः सर्गः उच्चते ।
सत्व-रजस्तमो गुणानामहङ्कार उतपद्यते। ततो त्रिविधेभ्योऽहंकारेभ्यः पञ्चतन्मात्राणि, इन्द्रियाणि, पञ्चमहाभूतानि इत्यादिभिः उत्पतिः क्रमः सर्ग एव उच्यते ।

**2. प्रतिसर्गः**

सर्गस्य
विपरितपरिणामानि प्रतिसर्गः कथ्यते। प्रतिसर्गः अर्थात् "प्रल" प्रलयः नित्यः, नैमितिकः, प्राकृतिकः, आत्यन्तिकश्चेति। अयं प्रलयः एव प्रतिसर्गः उच्यते। प्रोक्तमस्ति यद् -

"प्रतिसर्गः स्मृतो हि सः" ।
देवीभागवत्पुराणम (2.22)

**3. वंशः**

ब्रह्मा द्वारा उत्पन्नानां सर्वेषां ऋषिराज्ञां भूत-भविष्य-वर्तमानकालिकी सन्तानपरम्परा "वंशः" इति ।।

राज्ञा ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ।

**4. मन्वन्तरम्**

सृष्टेः विभिन्नानां कालमानानां द्योतकमेव मन्वन्तरम् । चतुर्दशमन्वन्तराणि सन्ति, तथा च प्रत्येकस्य मनुः भिन्नः वर्तते । यथा यथा मन्वन्तराणां मनोः अनुसारं कालविभाजनमैव मन्वन्तरमुच्यते ।

**5. वंशानुचरितम्**

वंशोत्पन्नानां राजानां विशेषविवरणं वंशानुविवरणं वा वंशानुचरितमिति नाम्नाऽनिभिधीयते ।। वंशानुचरितं विषये यथा -

"तेषां वंशानुकथनं वंशानुचरितं स्मृतम्" ।।

देवीभागवत. 1.2.25

**इति पञ्चलक्षणयुक्तपुराणानां संख्या, अष्टादश** 18 **मन्यन्ते विद्वांसः। ते त्रितयः यथा-**

**1. महापुराणानि - श्लोकसंख्या च ।**

मत्स्यमहापुराणम्-10,000
मार्कंडेय महापुराण-9,000
भागवतमहापुराणम्- 18,000
भविष्यमहापुराणम् -14,500
ब्रह्ममहापुराणम्-10,000
ब्रह्मवैवर्तकमहापुराणम् - 18,000
ब्रह्माण्ड महापुराण -12,000
वामनमहापुराणम्- 10,000
विष्णुमहापुराणम् - 23,000
वायुमहापुराणम् - 24,000
वाराहमहापुराणम्- 24,000
अग्निमहापुराणम्- 15,000-16,000
नारदमहापुराणम्-25,000
पद्ममहापुराणम्- 45,000,
लिङ्गमहापुराणम्- 2.4000-11000
गरुडमहापुराणम्-19,000
कूर्ममहापुराणम्-17,000
स्कन्दमहापुराणम्- 81,000

भागवत्पुराणम् -12/ 13.4-8

**2. उपपुराणानि**

1) आदिपुराणम् ।
2) नृसिंहपुराणम् ।
3) स्कन्दपुराणम् ।
4) धर्मपुराणम् ।
5) दुर्वासापुराणम् ।
6) नारदपुराणम् ।
7) कपिलपुराणम् ।
8) वामनपुराणम् ।
9) औशनसपुराणम् ।
10) ब्रंहमाडपुराणम् ।
11) कार्तिकपुराणम् ।
12) वरुणपुराणम् ।
13) माहेश्वरपुराणम् ।
14) साम्बपुराणम् ।
15) सौरपुराणम् ।
16) पाराशरपुराणम् ।
17) मारिचपुराणम् ।
18) भास्करपुराणम् ।

देवीभागवतपुराण 1.3.13-16

**3. औपपुराणानि**

1) सनत्कुमारपुराणम् ।
2) बृहन्नारदपुराणम् ।
3) आदित्यपुराणम् ।
4) सूर्यपुराणम् ।
5) नन्दिकेश्वरपुराणम् ।
6) कौर्मपुराणम् ।
7) भगवत्पुराणम् ।
8) वसिष्ठपुराणम् ।
9) भार्गवपुराणम् ।
10) मुद्गलपुराणम् ।
11) कल्किपुराणम् ।
12) देवीपुराणम् ।
13) महाभागवत्पुराणम्
14) बृह्मकर्मपुराणम् ।
15) परान्दपुराणम् ।
16) वह्निपुराणम् ।
17) पशुपतिपुराणम् ।
18) हरिवंशपुराणम् ।

एतेषां पुराणानां रचना "महर्षि" वेदव्यासेन कृताऽसीत्। वैदिकमन्त्राणाम्, वैदिकसूत्राणाञ्च गूढार्थाः महर्षिणा तत्र महाभारते तथा च पुराणेषु सरलतया प्रस्थापिताः । अनेन अद्भुत् कर्मणा तत्र चतुर्लक्षश्लोकाः प्रादुर्भूताः इति ।

"चर्तुरलक्ष्यमिदं प्रोक्तं व्यासेनाद्भुतकर्मणा"

वायुपुराणम् - 51.73

महर्षिवेदव्यासः साक्षाद् विष्णोः अवतारः ।

"कृष्णद्वैपायनः साक्षाद् विष्णुरेव न संशयः" ।।

कूर्मपुराणम् - 30.67

तथा च वेदव्यासेनैव सर्वेषां शुभपुराणानां रचना कृता इति -

"व्यासेनाकृत्वातिशुभं पुराणम्" ।

देवीभागवत - 1.3.36

सर्वेषु पुराणेषु देवीविषये च देवीस्वरूपविषये च अल्पं वा बृहद्रुपेण प्रोक्तमस्त्येव। तत्र सती, दुर्गा, लक्ष्मी, पार्वति, गौरी, कला, दशमहाविद्येत्यादीनि नामानि सन्ति ।

**उपसंहृतिः**

भगवत्याः महत्वं प्रायः संसारे न कश्चित् जनः न कश्चित् जीवोऽपि वक्तुं समर्थोऽस्ति, यस्याः देव्याः महिमा वेदेषु, पुराणेषु, शास्त्रेषु च परिपूर्णरूपेण न उपस्थापिताः, तस्याः अनन्तगुणाः, शक्तिस्वरूपायाः भगवत्याः स्वरूपं महत्वञ्च सामान्यजनस्य कृते तु अत्यधिकं काठिन्यं दुष्करञ्च स्वयमेव सिद्ध्यति। एताः शक्तयः त्रिगुणा, त्रिवर्णा, त्रिशक्ति सम्पन्ना च वर्तन्ते, इति तत्र वेदेषु पुराणेषु प्रोक्तमस्ति।

मानुष्यदेहे ज्ञानशक्तिस्वरुपेण सरस्वती, द्रव्यशक्तिस्वरूपेण महालक्ष्मीः, क्रियाशक्तिरुपेण महाकाली, बुद्धिस्वरुपेण पार्वती अस्ति। दया, क्षुधा, जाति, भ्रान्ति, शान्तिः, क्षान्तिः, तुष्टिः, पुष्टिः तथा मातास्वरूपेण सर्वासु जातिषु देवी वर्तते एव । सा देवी शक्तिस्वरूपेण सर्वत्र, स्वरूपेषु च सर्वत्र तिष्ठत्येव ।

"सर्वस्वरुपे सर्वेशे सर्वशक्तिसमन्विते"

सूर्ये तेजः, अग्नौ औष्ण्यम्, चन्द्रे शीतलत्वम्, पृथिव्यां क्षमा, सतीस्त्रीषु सतीत्वम्, स्त्रिषु वात्सल्यम्, मानवेषु दया, त्यागीषु तपस्या, तत्र स्थावरजङ्गमोद्विज-अण्डजेषु शक्तिस्वरूपा देवी निहिता अस्ति ।

"यस्यैषा वरा देवी स्वभावामर्शनोत्सुकाः ।
पूर्णत्वं सर्वभावानां यस्या नाल्पं न चाधिकम् ।।
कामकला विलास **-1**

**संदर्भग्रन्थाः**


1. देवीस्तोत्ररत्नाकर - गीताप्रेस गोरखपुर, 2018
2. विष्णुपुराणम् - गीताप्रेस गोरखपुर, 2018
3. श्रीमद्भागवतमहापुराणम्, गीताप्रेस गोरखपुर, 2018
4. छान्दोग्योपनिषद्, गीताप्रेस गोरखपुर, 2018
5. स्कन्दपुराणम्, गीताप्रेस गोरखपुर, 2018
6. नारदपुराणम्, गीताप्रेस गोरखपुर, 2018
7. महाभारतम्, गीताप्रेस गोरखपुर, 2018
8. वायुपुराणम्, गीताप्रेस गोरखपुर, 2018
9. पाणिनी अष्टाध्यायी, चौखम्बा संस्कृत भवन, 2010
10. अमरकोषः, चौखम्बा संस्कृत भवन, 2000
11. देवीभागवतमहापुराणम्, चौखम्बा संस्कृत भवन, 2012
12. कुर्मपुराणम्, चौखम्बा संस्कृत भवन, 2012
13. कामकला विलास - चौखम्बा सुरभारती, 1997